योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १२१

एकविंशत्यधिकशततमः सर्गः १२१

मनुरुवाच ।

यावद्विषयभोगाशा जीवाख्या तावदात्मनः ।

अविवेकेन संपन्ना साप्याशा हि न वस्तुतः ।। १

विवेकवशतो याता क्षयमाशा यदा तदा ।

आत्मा जीवत्वमुत्सृज्य ब्रह्मतामेत्यनामयः ।। २

ऊर्ध्वादधस्तथाधस्तात्पुनरूर्ध्वं व्रजंश्चिरम् ।

मा संसारारघट्टस्य चिन्तारज्ज्वां घटीभव ।। ३

इदं ममाहमस्येति व्यवहारघनभ्रमम् ।

ये मोहात्परिसेवन्ते अधस्ताद्यान्त्यधः शठाः ।। ४

अस्याहमेष मे सोऽयमहमेवं तु यैः किल ।

मोहो बुद्ध्या परित्यक्त ऊर्ध्वादूर्ध्वं प्रयान्ति ते ।। ५

स्वप्रकाशं स्वमात्मानमवलम्ब्याविलम्बितम् ।

आस्स्व संपूरिताकाशं जगन्ति नृप पश्य हे ।। ६

यदैवैवं चितो रूपं ततं बुद्धमखण्डितम् ।

तदैव तीर्णः संसारः परमेश्वरतां गतः ।। ७

ब्रह्मेन्द्रविष्णुवरुणा यद्यत्कर्तुं समुद्यताः ।

तदहं चिद्वपुः सर्वं करोमीत्येव भावयेत् ।। ८

येषु येषु यदा यद्यद्दर्शनेषु निगद्यते ।

सर्वमेवाङ्ग तत्सत्यं चिद्विलासो ह्यनङ्कुशः ।। ९

चिन्मात्रत्वं प्रयातस्य तीर्णमृत्योरचेतसः ।

यो भवेत्परमानन्दः केनासावुपमीयते ।। १०

नाप्यशून्यं न शून्यं च नाचिद्रूपं न चिन्मयम् ।

नात्मरूपं नान्यरूपं भुवनं भावयन्भव ।। ११

एतत्स्वरूपमासाद्य प्रकृतिः परिशाम्यति ।

न देशो मोक्षनामास्ति न कालो नेतरा स्थितिः ।।१२

अहंकृतेर्विमोहस्य क्षयेणेयं विलीयते ।

प्रकृतिर्भावनानाम्नी मोक्षः स्यादेष एव सः ।। १३

प्रशान्तशास्त्रार्थविचारचापलो

निवृत्तनानारसकाव्यकौतुकः ।

निरस्तनिःशेषविकल्पविप्लवः

समः सुखं तिष्ठति शाश्वतात्मकः ।। १४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पू० इक्ष्वाकुमनुसंवादो नामैकविंशत्यधिकशततमः सर्गः ।।१२१ ।।